# Shri Ganesha Stuti Shanishcharakrita

# શનિશ્ચરકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Shanishcharakrita

File name : gaNeshastutiHshanishcharakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM dvitIyaH khaNDaH | adhyAyaH 64 | 2.64. 14-28||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# શનિશ્ચરકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

શનિરુવાચ ।

નમસ્તે ગણનાથાય પુષ્ટિકાન્તાય તે નમઃ ।

વિશ્વમ્ભરાય સર્વાદિપૂજ્યાય તુ નમો નમઃ ॥ ૧૪॥

સર્વેષાં માતૃરૂપેણ સ્થિતેયં પુષ્ટિકારિકા ।

પિતા ત્વં પુષ્ટિદાતા ચ સત્તારૂપેણ સંસ્થિતઃ ॥ ૧૫॥

ક્ષમસ્વૈતં ચાપરાધં મદીયં ગણનાયક ।

પુત્રોઽહં તે મહાભાગ પ્રાર્થયે દ્વિરદાનન ॥ ૧૬॥

કિં સ્તૌમિ ત્વાં ચ હેરમ્બ યોગરૂપં સનાતનમ્ ।

વેદાદ્યૈર્યોગિભિઃ સ્તોતું શક્યતે ન નમામ્યહમ્ ॥ ૧૭॥

તથાપિ બુદ્ધિપ્રામાણ્યાત્ સ્તુવન્તિ ત્વાં મહેશ્વરાઃ ।

અતોઽહં ત્વાં મહારાજ સ્તૌમિ ભક્તિસમન્વિતઃ ॥ ૧૮॥

નમસ્તે બુદ્ધિકાન્તાય સિદ્ધિનાથ નમોઽસ્તુ તે ।

બ્રહ્મણાં પતયે તુભ્યં હેરમ્બાય નમો નમઃ ॥ ૧૯॥

સગુણત્વે સરૂપાય નૈર્ગુણ્યે ગજરૂપિણે ।

તયોર્યોગે ચ યોગાય શાન્તિરૂપાય તે નમઃ ॥ ૨૦॥

પુન્નામનરકાત્ત્રાતા પુત્રસ્તેન પ્રકીર્તિતઃ ।

શિવપુત્રાય વૈ તુભ્યં ગણેશાય નમો નમઃ ॥ ૨૧॥

સિદ્ધિર્માયા ચ વામાઙ્ગે માયિકે દક્ષિણે ચ ધીઃ ।

તયોરભેદયોગે ત્વમેકદન્તાય તે નમઃ ॥ ૨૨॥

એવમુક્ત્વા પ્રહર્ષેણ સરોમાઞ્ચો બભૂવ હ ।

પ્રણનામ સ સાષ્ટાઙ્ગં ભક્તિભાવેન સમ્પ્લુતઃ ॥ ૨૩॥

તમુત્થાપ્ય ગણાધીશો જગાદ સ શનૈશ્ચરમ્ ।

વરં વરય દાસ્યામિ યસ્તે ચિત્તે પ્રવર્તતે ॥ ૨૪॥

ત્વયા કૃતમિદં સ્તોત્રં મમ પ્રીતિકરં ભવેત્ ।

યઃ પઠિષ્યતિ યો મર્ત્યઃ શ્ૃણુયાત્ સર્વદં ભવેત્ ॥ ૨૫॥
તતસ્તં ગણનાથં સ ઉવાચ રવિનન્દનઃ ।
ભક્તિં દેહિ ત્વદીયાં મે શાપાન્ મોચય માં પ્રભો ॥ ૨૬॥
તતસ્તં ગણરાજશ્ચ સ જગાદાસુરેશ્વર ।
ભક્તિર્મદીયા ભવિતા દૃઢા સૌરે ન સંશયઃ ॥ ૨૭॥
ક્રૂરદૃષ્ટ્યા ચ યં કઞ્ચિત્ પશ્યસિ ત્વં શનૈશ્ચર ।
સ એવ નાશમાયાતુ નિઃશાપો ભવ સર્વદા ॥ ૨૮॥

ઇતિ શનિશ્ચરકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં દ્વિતીયઃ ખણ્ડઃ । અધ્યાયઃ ૬૪ । ૨.૬૪। ૧૪-૨૮॥

- .. mudgalapurANaM dvitIyaH khaNDaH . adhyAyaH 64 . 2.64. 14-28..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Shanishcharakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*